# संस्कृतशास्त्रशिक्षणविधयः

सस्मिता खण्डुआल*
डॉ. एस. एल.सीताराम शर्मा**

**सारांशः -**

संस्कृतभाषा हि पञ्चसहस्राधिकवर्षेतिहासयुक्तायाः भारतीयसभ्यतायाः प्रतिनिधिः। महती बौद्धिकी, सामाजिकी, नैतिकी, अध्यात्मिकी च परम्परा एतद्भाषायाः राराज्यते। वेदोपनिषच्छास्त्रादिषु, रामायणभारतादिषु च परिदृश्यमानं साहित्यं मानवमूल्यानि च प्रागिव अद्यापि नितरां प्रासङ्गिकानि । उच्चतमविकासं प्राप्तायाः सभ्यतायाः प्रातिनिध्यं वहति। संस्कृते मानवजीवनसम्बद्धानां सर्वेषामपि पक्षाणाम् उत्तमोत्तमं ज्ञानं ननु सन्निहितम्। शास्ति नियमयतीति शास्त्रमिति व्युत्पत्त्या कुत्सितमार्गावलम्बिनम् अधः पतन्तं नरं सदुपदेशेन सन्मार्गं दर्शयन्तम् उर्ध्वगामिनं करोति शास्त्रम्। अन्ततश्च मोक्षं गमयतीति शास्त्राणां महोपकारकत्वं वर्तते।

**कुञ्जीशब्दाः -** संस्कृतभाषा, भारतीयसभ्यता, बौद्धिकम्, सामाजिकम्, नैतिकम्, अध्यात्मम्, वेदः, उपनिषत्, शास्त्रम्, रामायणम्, महाभारतम्, साहित्यम्, मानवमूल्यानि, सदुपदेशः, मोक्षम्।

---

**शास्त्रम्** - शासु - अनुशिष्टौ इत्यस्माद्धातोः ष्ट्रन् प्रत्यये शास्त्रमिति रूपं सिद्ध्यति। शास्ति त्रायते चेति शास्त्रम्। अमरकोशकारः शास्त्रमेवं निर्वक्ति - **निदेशग्रन्थयोः शास्त्रं शस्त्रमायुधलोहयोः** इति। शास्त्रं निदेशने ग्रन्थविशेषे वा प्रयुज्यते। यथा - आज्ञा, नियमः, व्याकरणं, वेदविधिः, वेदः, धर्मशास्त्रं, ग्रन्थः इत्याद्यर्थबोधकम्। शास्त्रप्रकृतिमित्थं बोधयन्ति आचार्याः -

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।**
**पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥**
**तच्छास्त्रं त्रिविधं प्रोक्तं सात्त्विकादिविभेदतः।**
**सात्त्विकं तत्र वेदान्तं मीमांसा राजसं स्मृतम्।**

**तामासं न्यायशास्त्रञ्च हेतुवादाभियन्त्रितम्॥ (देवी. भाग.)**

इति देवीभागववचनात् यत् पुंसां नित्येन (श्रुत्या) अनित्येन (स्मृत्या) वा प्रवृत्तिं निवृत्तिं वा बोधयति तत् शास्त्रम् इति निगद्यते। तत् सात्त्विक-राजस-तामसभेदेन त्रिधा गण्यते। तथैव -

**शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते।**
**शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवादिभिः॥**

शास्त्रपदस्य अर्थद्वयं शासनं शंसनं चेति । शासनं शास्त्रम् - क्रियापरकं, शंसकशास्त्रं - ज्ञानपरकम् । शासनं द्विविधं प्रवृत्तिः निवृत्तिर्वा । शासनार्थे शास्त्रं क्रियापरकमतः पुरुषतन्त्रम् । शंसनार्थे शास्त्रं ज्ञानपरमतः वस्तुतन्त्रम्।

**यस्माद्रागद्वेषोद्धतचित्तान्समनुशास्ति सद्धर्मे।**
**सन्त्रायते च दुःखाच्छास्त्रमिति निरुच्यते सद्भिः॥** (प्रशमरतिप्रकरणम्)

शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति इति माघवचनात् सर्वसिद्धिप्रदायकमस्ति शास्त्रम्। एताभिः कारिकाभिः ज्ञायते यत् मानवस्य कल्याणोद्बोधकः कर्त्तव्योद्बोधकः तत्त्वविशेषः ग्रन्थविशेषो वा शास्त्रमित्युच्यते। शास्त्रप्रामाण्यं महत्त्वं वा प्रतिपाद्यते इत्थम् -

**शास्त्रतो गुरुतश्चैव स्वतश्चेति त्रिसिद्धयः।**
**सर्वत्र पुरुषार्थस्य न दैवस्य कदाचन॥**

लोके कार्यसिद्धिः त्रिधा भवति। तत्राद्यं शास्त्रं भवति। यत् जीवने पुरुषार्थचतुष्टयसम्पादकं ज्ञानं यच्छति तत् शास्त्रं भवति। यच्च रामादिवत् वर्तितव्यं न रावणादिवत् इति कर्तव्याकर्तव्यज्ञानं ददाति तदेव शास्त्रम् उच्यते।

शिक्षणविधीनां विमर्शनात्पूर्वम् आदौ जिज्ञासा सन्देहश्च उत्पद्यते । किमित्युक्तौ संस्कृत-शास्त्राध्ययनावश्यकता का इति ? अतः आदौ निरूप्यते शास्त्रध्ययनं किमर्थमिति ?

### ❖ संस्कृतशास्त्राध्ययनावश्यकता -

संस्कृतभाषा हि पञ्चसहस्राधिकवर्षेतिहासयुक्तायाः भारतीयसभ्यतायाः प्रतिनिधिः। महती बौद्धिकी, सामाजिकी, नैतिकी, अध्यात्मिकी च परम्परा एतद्भाषायाः राराज्यते । वेदोपनिषच्छास्त्रादिषु, रामायणभारतादिषु च परिदृश्यमानं साहित्यं मानवमूल्यानि च प्रागिव अद्यापि नितरां प्रासङ्गिकानि। उच्चतमविकासं प्राप्तायाः सभ्यतायाः प्रातिनिध्यं वहति। संस्कृते मानवजीवनसम्बद्धानां सर्वेषामपि पक्षाणाम् उत्तमोत्तमं ज्ञानं ननु सन्निहितम्। शास्ति नियमयतीति शास्त्रमिति व्युत्पत्त्या कुत्सितमार्गावलम्बिनम् अधः पतन्तं नरं सदुपदेशेन सन्मार्गं दर्शयन्तम् उर्ध्वगामिनं करोति शास्त्रम्। अन्ततश्च मोक्षं गमयतीति शास्त्राणां महोपकारकत्वं वर्तते। तथा चोक्तम् -

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**
**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥**

अपि च शास्त्रज्ञानविहीनस्य सर्वेषु कार्येषु नैके सन्देहा उत्पद्यन्ते किमिदं कार्यमाहोस्वित् अकार्यम्? अदो ग्राह्यमुत त्याज्यमित्यादि। शास्त्राध्ययनजनितज्ञानमहिम्ना सर्वसन्देहनिवृत्तिर्जायते। फलतः मानवः यत्कार्यमात्महितं तदेव कुरुते। अत एव अनेकसंशयोच्छेदीत्युक्तम्। शास्त्रज्ञानविहीनः प्रत्यक्षविषयमेव जानाति न तु परोक्षम्। शास्त्रं तु नैकैः प्रत्यक्षानुमानादिप्रमाणैः परोक्षमप्यर्थं दर्शयति। तस्मात् शास्त्रं नाम अविनश्वरं, बह्वर्थसाधकं, परोक्षार्थदर्शकं लोचनमिति। तादृग्लोचनं नास्ति यस्य, सः चक्षुष्मानप्यन्ध एव। अतः मानवेन सर्वेणापि शास्त्रचक्षुष्मता भाव्यम्।

### ❖ शास्त्रमाहात्म्यम् –

योगवासिष्ठे वसिष्ठमहर्षिः रामं शास्त्राध्ययनावश्यकतामित्थं प्रत्यपीपदत् -

**साध्वाचारवशाल्लोको भोगसम्प्राप्तिशङ्कया।**
**सन्देहश्चाप्यतत्त्वज्ञः शास्त्रादौ सम्प्रवर्तते॥**
**भोगार्थं सम्प्रवृत्तोऽसौ भोगमोक्षावुभावपि।**
**तस्मात्प्राप्नोति दार्वर्थी वनाच्चिन्तामणिं यथा॥**
**केचिच्चन्दनदारूणि केचिच्चिन्तामणिं मणिम्।**
**केचित्सामान्यरत्नानि प्राप्नुवन्ति यथा वनात्॥**
**केचित्कामं केचिदर्थं केचिद्धर्मत्रयं तु वा।**
**केचिन्मोक्षमशेषं च लभन्ते शास्त्रतस्तथा॥**
**सर्वार्थातिगतं शास्त्रे विद्यते ब्रह्मवेदनम्।**
**सर्वगातिगतं स्वच्छं लावण्यमिव योषिति॥**
**शास्त्रादभ्यासयोगेन चित्तं यातं विशुद्धताम्।**
**अनिच्छदेवमेवाशु पदं पश्यति पावनम्॥**
**नूनं मलं प्रधानेन क्षालयच्छास्वरूपिणा।**
**पुरुषः शुद्धतामेति परमां वस्तुशक्तितः॥**
**मुमुक्षुशास्त्रयोरेवं मिथः सम्बन्धमात्रतः।**
**सर्वसंवित्पदातीतमात्मज्ञानं प्रवर्तते॥**
**अनयोः प्रेक्षणाद्देहे विवेको जायते यथा।**
**तथा स्वभावतः शास्त्रविवेकाज्ज्ञेयवेदनम्॥**
**लोष्टेन लोष्टसलिले क्षालयन्बालको यथा।**
**क्षयेण लोष्टयोर्हस्तनैर्मल्यं लभते परम्॥**
**तथा शास्त्रविकल्पोधैर्विकल्पांश्चेतनादुधः।**
**क्षालयन्स्वविचारेण परमां याति शुद्धताम्॥**

**महावाक्यार्थनिष्यन्दं स्वात्मज्ञानमवाप्यते।**
**शास्त्रादेरिक्षुरसतः स्वाद्विव स्वानुभूतितः॥**
**एवं हि सर्वमेतत्तच्छास्त्रादेः समवाप्यते।**
**तस्मात्सर्वप्रयत्नेन शास्त्राद्यभ्यासमाहरेत्॥**
**शास्त्रार्थभावनवशेन गिरा गुरूणां**
**सत्सङ्गमेन नियमेन शमेन शम।**
**तत्राप्यते सकलविश्वपदादतीतं**
**सर्वेश्वरं परममाद्यमनादिशर्म॥**

इत्येवं भारतीयप्राचीनशास्त्रेषु शास्त्राध्ययनस्य आवश्यकता निरूपिता। तथैव शास्त्रस्य संरक्षणार्थं शास्त्रेषु तत् तत् शास्त्रस्य अध्ययनाध्यापनाय केचन शिक्षणविधयः प्रोक्ताः परम्पराप्रयुक्ताश्च।

❖ **भारतीयप्राचीनसंस्कृतशिक्षणविधयः -**

अध्यापकेन शिक्षणार्थम् उपयुज्यमानाः विधयः शिक्षणविधयः। भारते वैदिककालादारभ्य संस्कृताध्यापनाय काश्चनशिक्षणविधयः उपायुज्यन्ते। एतेषु विधिषु केचन प्राचीन-शिक्षणविधयः, केचन नवीनशिक्षणविधयः सन्ति। वस्तुतः विधिः किमर्थः ?। बोधने छात्राणाम् अधिगमार्थं मानसिकविकासार्थं च समीचीनाः शिक्षणविधयः आश्रयणीयाः। संस्कृतशिक्षणेऽपि एते विधयः आवश्यकाः वर्तन्ते। अधिगमप्रणाल्यां विद्यमानाः सर्वे अंशाः एकस्यां पद्धत्यामेव बोधयितुं न शक्यन्ते। छात्राणां वयः, विषयं, कक्षां, स्तरं, परिवेशं तथैव विषयवस्तुनः स्वरूपञ्च मनसि निधाय यस्मिन् समये यः विधिः योग्यतरः सः विधिराश्रयणीयः। भारतीयप्राचीनशास्त्रणाम् अध्यापनाय नैके शिक्षणविधयः समाश्रिताः। तत्रापि वेदात् काव्यपर्यन्तं विषयानुगुणं शिक्षणविधयः उपायुज्यन्ते।

❖ **भारतीयप्राचीनाधिगमशिक्षणविधयः -**

1. वेदशिक्षणविधयः
2. न्यायशास्त्रशिक्षणविधयः
3. उपनिषच्छिक्षणविधयः
4. वैशेषिकशास्त्रशिक्षणविधयः
5. दर्शनशास्त्रशिक्षणविधयः
6. सांख्यशास्त्रशिक्षणविधयः
7. आयुर्वेदशास्त्रशिक्षणविधयः
8. योगशास्त्रशिक्षणविधयः
9. धर्मशास्त्रशिक्षणविधयः

10. मीमांसाशास्त्रशिक्षणविधयः
11. व्याकरणशास्त्रशिक्षणविधयः
12. वेदान्तशास्त्रशिक्षणविधयः
13. साहित्यशास्त्रशिक्षणविधयः

उपर्युक्तप्रकारेषु कतिचन विधयः यथाशक्ति प्रतिपाद्यन्ते अधुना।

☐ **मौखिकविधिः व्यक्तिगतशिक्षणविधिर्वा -**

सप्तदशशताब्दी पर्यन्तं मुख्यतः अयं विधिः गुरुकुलेषु, पाठशालासु मठेषु च प्रचलितः आसीत् । तदा शिक्षणं मौखिकरूपेणैव एव भवति स्म । वेदमन्त्राणाम् उच्चारणं छात्रैः वारं वारं क्रियते। छात्रैः कृतानां उच्चारणसम्बद्धदोषाणां निवारणं शिक्षकेण व्यक्तिगतरूपेण क्रियते स्म । श्रवणस्य, निदिध्यासनस्य प्रक्रियामपि मननस्य, कण्ठस्थीकरणस्य विशिष्टं स्थानं विद्यते । ते स्वीकुर्वन्ति यत्-

**पुस्तकस्था तु या विद्या परहस्तगतं धनम्।**
**कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्॥**

अर्थात् विद्या, अन्यस्य हस्ते गतं धनं च यदि यथासमयं प्राप्तं न भवति तदा विद्या धनञ्च व्यर्थमेव।

**गुणाः -**

- अनेन विधिना छात्राणाम् उच्चारणं शुद्धं भवति।
- मौखिकाभिव्यक्तौ सशक्ताः भवन्ति।

☐ **पारायणविधिः -**

अयं विधिः अपि कण्ठस्थीकरणोपरि बलं ददाति। वैदिकमन्त्राणां सस्वरपाठकरणं पारायणं कथ्यते स्म । नियमानुसारं पारायणकर्तृछात्रः, पारायणिको भवति । पाठस्य सरलकठिनतायाः च अनुसारेण अनेक प्रकारेण भवति पारायणम् । पाठस्य अनुसारेण पारायणस्य संख्या निर्धारिता भवति। यथा -

✓ पञ्चकाध्ययनम् (पाठं पञ्चवारं पठनम्)।
✓ पञ्चवारम् (शब्दान् पञ्चवारं कथनम्)।
✓ पञ्चरूपम् (पञ्चवारं पठनम्)।

**गुणः**

- अनेन विधिना प्राप्तज्ञानस्य रक्षणम् आगामिवंशपरम्परायाः कृते भवति स्म।

☐ **वाद-विवादविधिः**

अस्मिन् विधौ कण्ठस्थीकरणेन सह अवबोधने उपरि बलं दीयते स्म । तत्स्थलीयं भाषणप्रदर्शनं भाषण-व्याख्या-सम्यक्-विभति-विप्रलाप-आदीनां शब्दानां प्रयोगः पाणिनिना कृतः। यः शिष्यः वादविवादे विजयी भवति स एव तस्य विषयस्य अधिकारी मन्यते स्म। शास्त्रार्थः संवादश्च अस्य विधेः उदाहरणानि सन्ति। यथा यम-यमीसंवाद, गार्गी-मैत्रेयीसंवाद। दार्शनिकतत्वानां शिक्षणं मुख्यतः न्यायशास्त्रस्य अध्यापनं तर्कविधिना प्रचलितम् आसीत्।

**गुणाः**

- अनेन छात्राणां भावप्रकाशनस्य शक्तेः विकासो भवति।
- छात्रेषु स्वाध्यायस्य प्रवृत्तिः आयाति।

☐ **प्रश्नोत्तरविधिः -**

वैदिककाले शिक्षकः प्रश्नोतरविधिना शिक्षणं करोति स्म । प्रतिप्रश्नानन्तरं छात्रैः तस्यावृत्तिः क्रियते स्म । यदा शिक्षकः सङ्केतमात्रं ददाति तदा छात्राः उत्तरम् अन्विष्यन्ति स्म यतेहि जिज्ञासायाः अभावे ज्ञानं नास्ति अतः वैदिकशिक्षायां प्रश्नानां महत्त्वं स्वीकृतम्।

**गुणाः**

- छात्राः सक्रियाः भवन्ति।
- छात्राणां चिन्तन-तर्क-निरीक्षणशक्तीनां विकासो भवति।

☐ **सूत्रविधिः** -

अयं संस्कृतव्याकरणशिक्षणस्य, दर्शनशिक्षणस्य च प्राचीनतमो विधिर्विद्यते । सूत्राणां मुख्यम् उद्देश्यं **घटे समुद्रपूरणम्** आसीत् । अनेन नियमानां सूत्ररूपेण कण्ठस्थीकरणं क्रियते स्म । एतेषां सूत्राणां व्याख्यायाः कृते भाष्यविधेः टीकाविधेश्च अनुसरणं क्रियते स्म।

**गुणाः**

- क्लिष्टविषयाणाम् अवगमने स्मरणे च सौविध्यं भवति।

☐ **कथाकथनविधिः -**

कथाकथनमपि एका कला वर्तते । विषये रुच्युत्पादनाय, विषयस्य स्पष्टीकरणाय च प्राचीनकाले अपि पाठस्य मध्ये मध्ये पञ्चतन्त्र-हितोपदेशसदृशकथानाम् उदाहरणानि शिक्षकैः दीयन्ते स्म।

**गुणाः**

- बालकेषु कल्पनाशक्तेः विकासो भवति।

- शिक्षणं सरलं भवति।
- बालकेषु श्रुत्वा अर्थग्रहणस्य क्षमतोत्पादनं भवति।

☐ **व्याख्याविधिः -**

शङ्का समाधानाय शिक्षकेण अस्य विधेः अनुसरणं क्रियते स्म । अस्मिन् विधौ षडङ्गानि भवन्ति। (1) पदच्छेदः (2) पदार्थोक्तिः (3) विग्रहः (4) वाक्ययोजना (5) आक्षेपः (6) समाधानम्। इति षडङ्गैः कस्याऽपि श्लोकस्य व्याख्या सुस्पष्टा भवति।

**गुणाः**

- विषयस्य विस्तृतं ज्ञानं भवति।
- छात्राणां मानसिकक्रियाशीलतायां वृद्धिः जायते।

☐ **व्याकरणविधिः**

भाषायाः प्राणतत्त्वम् अस्ति व्याकरणम् । व्याकरणं शब्दानुशासनमेव कथ्यते । इदं विना भाषायाः ज्ञानम् अपूर्णं भवति, अतः भाषाज्ञानाय तस्याः भाषायाः व्याकरणस्य ज्ञानमावश्यकम् अस्ति । प्राचीनसमये वेदाध्यनाय व्याकरणस्य पठनपाठनं विशेषरूपेण भवति स्म । पतञ्जलिना महाभाष्ये लिखितम् यत् **रक्षार्थं वेदानाम् अध्येयं व्याकरणम्**।

**गुणाः**

- अनेन भाषायाः ध्वनितत्त्वैः छात्राः परिचिताः भवन्ति।
- भाषायाः शुद्धलेखनस्य उच्चारणस्य च ज्ञानं भवति।

☐ **व्याकरणानुवादविधिः (भण्डारकरविधिः) -**

विधिरयं 1835 ईसवीयवर्षे लॉर्ड मैकाले महोदयेन प्रदत्तशिक्षापद्धत्याः अनन्तरं विकासोऽभूत्। डॉ. रामकृष्णगोपालभण्डारकर महोदयेन पाश्चात्य प्रणालौम् आश्रित्य संस्कृतभाषाध्यापनाय एकः नवीनविधिः आविष्कृतः। तस्यैव नाम्ना विधिरयं भण्डारकरविधिः इति प्रसिद्धिम् अलभत। तेन व्याकरणानुवादविधिम् आश्रित्य पुस्तकद्वयं विरचितम्-

1. मार्गोपदेशिका
2. संस्कृतमन्दिरान्तः प्रवेशिका।

वामनशिवराम आप्टे महोदयेन "The student's guide to sanskrit composition" इत्यस्यां रचनायाम् अस्य विधेः अनुकरणं कृतम्।

☐ **व्याकरणानुवादविधेः गुणाः**

विधिरयं मनोवैज्ञानिकसिद्धान्तानाम् अनुसरणं करोति। प्रौढानां स्वयं पाठितछात्राणां पत्राचार पाठ्यक्रमाणां च कृते उपयोगी अस्ति । अनेन विधिना आधारितानि पुस्तकानि छात्राणां पथ-प्रदर्शकानि भवन्ति। विषयाणां सम्यग्रूपेण वर्गीकरणेन आध्ययने काठिन्यतां निवारयति।

➢ **सन्दर्भग्रन्थसूची :-**


1. डा. प्रह्लाद. रा जोशि, संस्कृत शिक्षणम्, प्रकाशनवर्षम् - 2004.
2. डा सोमाशि लक्ष्मि सीताराम शर्मा, शास्त्रशिक्षणम्, प्रकाशनवर्षम् -2019.
3. डा. सच्चितानन्द मुर्तिः, वाकोवाक्यविधि, प्रकाशनवर्षम् -2019.


*****

*शोधच्छात्रा, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सहायकाचार्यः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः ।